M. T. B. COLLEGE, SURAT

*Manuscripts Library*

No. Ref.
Ser. 1261

Title: Bhaminivilasa

1261

incomplete

| | | | |
|---|---|---|---|
| | | Bhamini Vilāsa | **Title** |
| | Pandit | Jagannātha | Author |
| | | | Editor |
| | | | Year, Vols. |
| | | | Publisher |
| 1261 | | | Remarks |

वनांते स्खलंती शशकशिशुमालोक्य चकिता भुजप्रांतं भर्तुर्भजति भयहर्तुः सपदि
या॥ अहो सेयं सीता दशवदननीता हलपदैः रितारक्षोभिः श्रयति विवशा कामपि
दशां॥ ७८ पुरा गीर्वाणानां निजभुजबलाहोपुरुषिकामहोकारंकारं पशुभिदि शरं स
मुखयतः स्मरस्यस्वीबाला नयनसुमनामालार्चनपदं वपुः सद्यो भालानलभासि
तजालास्पदमभूत्॥ ७९ युक्तं सभायां खलु मर्कटानां शाखास्तरूणां मृदुलास
नानि॥ सुभाषितं चीत्कृतिरातिथेयी दंतैर्नखाग्रैश्च विपाटनानि ८० किं तीर्थं हरि
पादपद्मभजनं किं रत्नमच्छा मतिः किं शास्त्रं श्रवणेन यस्य गलति द्वैतांधकारोदयः॥
किं मित्रं सततोपकाररसिकं तत्त्वावबोधः सखे कः शत्रुर्वद खेददानकुशलो दुर्वास
नासंचयः॥ ८१ निष्णातोपि च वेदांते साधुत्वं नैति दुर्जनः॥ चिरं जलनिधौ मग्नो
मैनाक इव मार्दवं॥ ८२ नैर्गुण्यमेव साधीयो धिगस्तु गुणगौरवं॥ शाखिनोन्ये
विराजंते खंड्यंते चंदनद्रुमाः ८३ परोपसर्पणानंतचिंतानलशिखाशतैः॥ अचुंबि
तांतःकरणाः साधु जीवंति पादपाः॥ ८४ अन्योपि च गुणावंतामातन्वानः स्वकी
यगुणजालैः॥ विवराणि मुद्रय द्रागूर्णायुरिव सुजनो जयति ८५ खलः स

ज्जनकार्पासरक्षणैकहुताशनः परदुःखाग्निनुधमने मारुतः केन वर्णितां
८६ परगुह्यगुप्तिनिपुणं गुणमयमखिलैः समाहितं नितरां॥ ललितांबरमिव सज्ज
नमाखव इव दूषयंति खलाः ८७ यत्नः सौरस्यलब्धुर्नः शांतिशैत्यहुताशनः कारुण्यकु
सुमाकाशः खलः सज्जनदुःखदः ८८ धत्ते भरं कुसुमपत्रफलावलीनां मर्मव्यथां वहति शीत
भवां रुजं च यो देहमर्पयति चान्यसुखस्य हेतोस्तस्मै वदान्यगुरवे तरवे नमोस्तु ८९ हालाहलं
खलु पिपासति कौतुकेन कालानलं परिचुचुंबिषति प्रकामं॥ व्यालाधिपं च यतते परिरब्धु
मद्धा यो दुर्जनं वशयितुं तनुते मनीषां ९० दीनानामिह परिहाय शुष्कसस्यान्यौदार्यं प्रक
टयतो महीधरेषु औन्नत्यं विपुलमवाप्य दुर्मदस्य ज्ञातोयं जलधर तावको विवेकः ९१
गिरयो गुरवस्तेभ्योप्युर्वी गुर्वी ततोपि जगदंडं॥ तस्मादप्यतिगुरवः प्रलयेप्यचलात्मकाः सं
तः ९२ व्योमनि बीजं कुरुते चित्रं निर्माति यत्नतः सलिले॥ स्नपयति पवनं सलिले यस्तु
खले चरति सत्कारं ९३ हारं वक्षसि केनापि दत्तमज्ञेन मर्कटः॥ लेढि जिघ्रति संक्षिप्य
करोत्युन्नतमासनं ९४ मलिनेपि रागपूर्णां विकसितवदनामनल्पजल्पेपि॥
त्वयि चपलेपि च सरसां भ्रमर कथं वा सरोजिनीं त्यजसि ९५ स्वार्थं धनानि धन
काः प्रतिगृह्णतो यदास्यं भजेन्मलिनतां किमिदं विचित्रं॥ गृह्णन्परार्थमपि वारि नि

ना

धेः पयोपि मेघोयमेति सकलोपि च कालिमानं॥ ९६ जनकः सानुविशेषो
जातिः काष्ठं भुजंगमैः संगः॥ स्वगुणैरेव पटीर यातोसि त्वं तथा महिमानं॥ ९७
कस्मै हंत फलाय सज्जन गुणग्रामार्जने सज्जसि स्वात्मोपस्करणाय चेन्मम वचः प
थ्यं समाकर्णय॥ ये भावा हृदयं हरंति नितरां शोभाभरैः संभृतास्तैरेवास्य कलेः क
लेवरपुषो दैनंदिनं वर्तनं॥ ९८ धूमायिता दश दिशो दलितारविंदा देहं दहंति दहना
इव गंधवाहाः॥ त्वामंतरेण मृदुताम्रदलाम्रगुंजद्गुंजन्मधुव्रत मधौ किल को
किलस्य ९९ भिन्ना महागिरिशिला करजाग्रजाग्रदुद्दामशौर्यनिकरैः करटिभ्रमे
णा॥ दैवे पराचि करिणामरिणा तथापि कुत्रापि नापि खलु हा पिशितस्य लेशः॥ १
१०० गर्जितमाकर्ण्य मनागंके मातुर्निशार्भजातोपि॥ हरिशिशुरुत्पतत्प्रागां
गान्याकुंच्य लीयते निभृतं॥ १०१ इति श्रीमत्पंडितराजजगन्नाथवि
रचिते भामिनीविलासे प्रास्ताविकः प्रथमो विलासः॥ १... ९९ ९९
केशवसुततपुरं पाटलिपुत्रं पुरमिह घना॥ दिति मंदिरं स्मरतां श्रोरवि श्रोरवातिकल्प॥
प्रं॥

नूतं मत्तगजैः कियत्कियदपि छिन्नं कुठारादिभिः शिष्टं यामजभीषणभानुकरपो
भस्मीकृतं काननं एषा कोणगतागुरुः परिमलैरामोदयंती दिशो हा कष्टं ललितालवंग
लतिका दावाग्निनादह्यते ५४ स्वर्लोकस्याधिरथामणिः सुरतरुर्यामस्य धामाद्भुतं पौ
४ लोमीपुरुहूतयोः परिणतिः पुण्यावली नामसिद्धि॥ सत्यं नंदनकिल्पिदं सहृदयैर्नित्यावधि प्रा
र्थ्यते त्वत्तः स्वाउ वरंगतां उवनमौ दो हृदरे स्त वैश्वानरः॥ ५५॥ स्वस्वव्याघ्रातिमग्नमानस
तया मत्तो नितत्तेजनेच चकोटिनिवारितागेञ्ज इतोयास्यास्य हंपंगरात॥ एवं कीरवरे मनो
रथमयीं स्वमास्वाद्य त्वं तः संभाविवेशा वारणकराकरः फाणिग्रामणी ५६ रे चांच
ल्यजुषो मृगाः श्रितनगाः कल्लोलमाला कुलामेताम बुधकामिनी व्यवसिता संगाह
तुं वा कथं॥ अत्रैव द्वुगि र्स्वरमहावर्तैः समावर्तितो यद्वा वेदरसात पुनरसौ
यातोऽगाग्रामणीः॥ ५७ पिबन्यस्तं पातत्वमिहमददंतावलधिया रंगंता नाथ लोकं मि
तिहरिंदं तेषु पुरुषान्॥ नयाप्वा लोकानापमपि हृदयतापं परिणुदन्नयं धीरं धीरं ध्वनति
नवनीलोऽजलधरः॥ ५८ धीनध्वानाभिरलं तेनिरदमेनास्ति कोगर्भः॥ उन्मदवारुणर
बुध्यामन्ध्वे जठरं समुच्छलति ५९ वेतं तुंगंडकं उन्तपांडित्वपारपंथिना॥ हरिणाहरि
णालीषु कथ्यतां कः पराक्रमः॥ ६०॥ निराच्छिन्नमलितोजनि मे धुरतारा मा सुरवस्पर्धिनी

वासो यस्य हरेः करे परिमलो गीर्वाणचेतोहरः॥ सर्वस्वं तदहो महाकविगिरां कामस्य
चांभोरुह त्वं चेच्छ्रीति मुनिकरोषि मधुपैस्त्वां किमाचक्ष्महे ६१॥ लीलामुकुलितन
५ यनं किं सुखशायनं समातनुषे॥ परिणामविषम हरिणाकरिनायक वर्धते वैरं॥ ६२
विदुषां वदनाद्वाचः सहसा यांति नो बहिः॥ याताश्चेन्न पराचंति द्विरदानां रदा इव ६३
औदार्यं भुवनत्रये पि विदितं संभूतिरंभोनिधेर्वासो नंदनकानने परिमलो गीर्वाणि
चेतोहरः॥ एवं दातृगुरोर्गुणाः सुरतरोः सर्वेपि लोकोत्तराः स्यादर्थिप्रवरार्थिता पालि
धावेकोविवेको यदि ६४ एकोविभ्यसतां हराम्यपघृणः प्राणानहं प्राणिनामित्येवं
परिचिंत्य मा स्म मनसि व्याधानुतापं कृथाः॥ भूपानामिव नेषु किं च निमलं भत्रेषु
गृहाशयाः साधूनामरवा वसंति कति नत्वतुल्यकक्ष्यामनलाः॥ ६५ विश्वास्य म
धुरवचनैः साधूनन्ये वंचयंति नम्रतमाः॥ तानपि दधासि मातः काश्यपि यातस्तवापि वा
च विवेकः॥ ६६॥ अन्यासगाद्भुतमयी मनसः प्रवृत्तिरन्यैव कापि रचना वचनावली
नां॥ लोकोत्तरा च कृतिराकृतिरात्तहृद्या विद्यावतां सकलमेव गिरां दवीयः॥ ६७
आकृतः खलु मलयमरुच्चक्रवर्ति विस्तारयत्यकृतपूर्वमुदारभावं॥ कालागरोर्द
हनमभ्युपगतः समन्तात् लोकोत्तरं परिमलं प्रकटीकरोति॥ ६८॥ विश्वाभिरामगुणगौ
रवगुम्फितानां रोषोपि निर्मलधियां रमणीय एव॥ लोकंपृणैः परिमलैः परिपूरित

स्य काश्मीरजस्य कटुतापि नितांतरम्या ६९ लीलालुंठितशारदापुरमहासंपद्भ
राणां पुरो विद्यासद्मविनिर्गलत्कणमुषो वल्गंति चेत्पामराः अद्य श्वः फणिनां शकुंत
शिशवो दंतावलानां शशाः सिंहानां च सुखेन मूर्धनि पदं धास्यंति शालावृकाः ७०
गीर्भिर्गुरूणां परुषाक्षराभिस्तिरस्कृता यांति नरा महत्वं अलब्धशाणोत्कषणा न
पाणां न जातु मौलौ मणयो वसंति ७१ वहति निवधरान्परीरजन्माशिरसि मषीपटलं द
धाति दीपः॥ विधुरपि भजतेतरां कलंकं पिशुनजनं खलु बिभ्रति क्षितीन्द्राः ७२ सत्पुरुषः
खलु हिताचरणैरमंदमानंदयत्यखिललोकमनुक्त एव॥ आराधितः कथय केन करैरुदा
रैरिंदुर्विकासयति कैरविणी कुलानि॥ ७३ परार्थव्यासंगादुपजहदथ स्वार्थपरताम भे
दैकत्वं यो वहति गुणभूतेषु सततं स्वभावाद्यस्यांतः स्फुरति ललितोदात्तमहिमा समर्थो
यो नित्यं स जयति ततो कोपि पुरुषः॥ ७४ वंशभवो गुणवानपि संगविशेषेण पूज्यते
पुरुषः॥ नहि तुंबीफलविकलो वीणादंडः प्रयाति महिमानं ७५ अमितगुणोपि पदार्थो
दोषेणैकेन निंदितो भवति निखिलरसायनमहितो गंधेनोग्रेण लशुन इव ७६
उपकारमेव तनुते विपद्गतः सद्गुणो नितरां मूर्छां गतो मृतो वा निदर्शनं पारदोऽत्र रसः॥
७७